नं० ४६६५ - घ

हेमाद्रौ तीर्थस्नान प्रयोगः

पत्राणि ११

नं० ४६६५-च

तीर्थस्नानप्रयोगः हेमाद्रौ

नं० ४६६५-च

पत्राणि ११

4665

11

नं० ६६६५-घ

हेमाद्रौ तीर्थस्नानप्रयोगः

पत्राणि ११

॥श्रीगणेशायनमः॥अथमहातीर्थहिमाद्रीस्नानप्रयोगः॥तीर्थस्नानाधि
कारार्थंफलपुष्पाक्षतादीन्गृहीत्वातीर्थप्रार्थनांकुर्यात्॥विष्णुपाद
प्रसूतासिदेवैष्णवीलोकपावनी॥त्राहिमस्तेनसत्तस्मादाजन्ममर
णांतिकात्॥तिस्रःकोट्योर्द्धकोटीचतीर्थानांवायुरब्रवीत्॥दिविभु
व्यंतरिक्षेचतानितेसंतुजाह्नवी॥नंदिनीत्येवतेनामदेवेषुनलिनी
तिच॥दक्षापृथिवीविहगांविश्वकायामितोमृता॥विद्याधरीसुप्र
सन्नातथालोकप्रसादिनी॥वदंतेत्वांमहादेवीभागीरथीनमोस्तु १
ते।आँदावादि॥१॥नमस्तेकमलनाभायनमस्तेजलशायिने॥नमस्ते
स्तुहृषीकेशगृहाणार्घ्यंनमोस्तुते॥इतिस्तुत्वाफलपुष्पाक्षतादि

त्समर्पयेत्॥ त्रिवेण्यैनमः॥ साष्टांगं प्रणमेत्॥ प्रणवेन तीर्थजलं
स्पृशेत्॥ प्रायश्चित्ताधिकारार्थं सचेलं स्नानं कृत्वा तटे आगत्य प्राङ्
मुख उदङ्मुखो वा उपविश्याचम्य॥ अद्येत्यादि एवं गुण विशिष्टा
यां पुण्यतिथौ॥ गंगापतितिष्ठा घावछे दनीय परोम संख्यावर्षसह
स्रावच्छिन्नस्वर्गलोकमिहलत्वकामो ऽस्मिन्तीर्थे वपनमहं
करिष्ये॥ तत्र मंत्रः॥ आत्मनः शुद्धिकामो वा पितॄणां तारिते
तवे॥ वपनं कारयाम्यत्र तीरे तव जाह्नवी॥ यानि कानि च
पापानि ब्रह्महत्यासमानि च॥ केशानाश्रित्य तिष्ठंति तस्मा
स्मात् केशान्वपाम्यहं॥ इति मंत्रमुक्त्वा शिरवा कक्षोपस्थ

वंजकेशश्मश्रूनखलोमानि वापयेत् ॥ दक्षिणकर्णमारभ्य
वामकर्णपर्यंतंउदसंस्पृष्टंकेशवपनं ॥ तदनंतरंउदकसंस्पृष्टंलो
मनखान्वापयेत् ॥ ततः देहशुद्धिनिमित्तंसंकल्पपूर्वकंस्ना
नमाचरेत् ॥ ततः भस्मादिदशविधिस्नानं ॥ अद्येत्यादि प्रा
याश्चित्तांगभूतंभस्मादिदशविधिनास्नानमहंकरिष्ये ॥ तत्र
र्यभस्म ॥ यथाग्निदहतेभस्मतृणकाष्ठादिसंचयं ॥ तथाभ
दहतांपापंकुरुभस्मशुचेशुचिं ॥ पवित्रमतुलंह्येतत्पस २
स्मंहरवल्लभं ॥ तेनैवतुपापौघंभस्मस्नानंविधार्षसेवितं ॥ प्रत्ये
कमुदकस्नानं ॥ आचम ॥ प्रत्येकं ॥ अथमृत्तिका ॥ अश्वक्रांते ॥

अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे ।। शिरसा धारयिष्यामि
रक्षस्व मां पदे पदे ।। उद्धृतासि वराहेण कृष्णेन शतबाहुना ।। मृत्ति
के हर मे पापं यन्मया दुष्कृतं कृतं ।। मृत्तिके ब्रह्मदत्तासि काश्य
पेनाभिवंदिता ।। मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितं ।। मृत्
प्रतिष्ठिते सर्वं तन्मे निर्णुद मृत्तिके ।। तया हतेन पापेन सर्वपापैः
3 प्रमुच्यते ।। इति मंत्रै अंगोद्धर्षनं ।। शिरसि मृदं निधाय मृत्तिका
स्नानं ।। अथ गोमयं ।। गोमये वसते लक्ष्मीः पवित्रं सर्वमंगलं ।।
स्नानार्थं संस्कृतं देव पापं मे हर गोमय ।। अग्रमग्रं चरंतीनां ओष
धीनां वने वने ।। तासामृषभपत्नीनां पवित्रं कायशोधनं ।। य

न्मेरोगेच्वशोकंचतन्मेदहतुगोमयं॥अथगोमूत्रं॥गोमूत्रेवसतेगं
गायमुनानर्मदातथास्नानेनानेनमेदेवसर्वपापंव्यपोहतु॥अ
थपयस्नानं॥क्षीरंयत्नत्क्षिरीणांचधेनूनांसमुद्भवं॥विश्वस्या
स्यातिप्यैंकरंयतन्मेदहतुदुष्कृतं॥अथदधिस्नानं॥गोरस
3 क्षीरसंभूतंदधिमस्यविकारजं॥तन्मेदहतुपापानिशरीरा
रेणकृतानिच॥अथगोरजस्नानं॥गवांखुरेणनिर्धूतंयद्र
णुगगनेगतं॥रजसातेनसंयोगोमहापातकनाशनं॥ २
वनप्रक्रम्यमाणानांपुनरागमनेगवां॥रजःपादेषुरस्तु
स्मांपवित्रंतत्सुनातुमां॥अथघृतस्नानं॥घृतंमेहृदयंति

5

त्वं घृतं नाभ्यां प्रतिष्ठितं ॥ घृतं मे सर्वतश्चैव घृतं मे मनसि
स्थितं ॥ अथ सप्तधान्यस्नानं ॥ धान्योषधी मनुष्याणां जी
वनं परमं स्मृतं ॥ तेन स्नानेन देवेश मम पापं व्यपोहतु ॥ व्री
ह्यो यवा गोधूमा मुद्गा माषा वाश्चियेगवः ॥ तिलाश्च सप्तमा
प्रोक्ताः सप्तधान्यमुदाहृतं ॥ अथ फलस्नानं ॥ वनस्पतिर
सा दिव्याः फलपुष्पर्द्धवलोमदा ॥ तेन स्नानेन मे देव फले
ब्रतमनंतकं ॥ अथ सर्वौषधी ॥ औषध्यः सर्ववृक्षाणां तृ
णगुल्मलतास्तु या ॥ दूर्वासर्षपसंयुक्ता नरः सर्वौषध्यः उ
नालुमां ॥ अथ कुशोदकं ॥ कुशमूले स्थितो ब्रह्मा कुशम

ध्येजनार्द्दन॥ कुशाग्रेशं करोदवतेननश्यंतुपातकं॥ अथहिर
ण्यस्नाने॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसो॥ अनंतपु
ण्यफलदंमतः शांतिंप्रयच्छमे॥ अथगंगास्नानं॥ विष्णुपा
दाग्रसंभूतगंगेत्रिपथगामिनी धर्मद्रवेतिविख्याता पा
पंमेहरजाह्नवी॥ अथचरणामृतस्नानं॥ ॥१०॥२॥२॥ ती
र्थादिकेनस्नुस्नातंसर्वतीर्थेषुदीक्षितैः॥ ॥२॥२॥ शालि
ग्रामशिलातोयेयेभिषेकंसमाचरेत्॥ ॥२॥२॥ गंगा ४
यांचकुरुक्षेत्रेप्रयागेदविसंगमे॥ ॥२॥१०॥ तीर्थान्विता
निसर्वाणिपापंहंतिपुराकृतम्॥ इतिदशविधस्नानम्॥

एवं दशविधिस्नानानि विधाय। पुनः हेमाद्रौ प्रयोगपूर्वकं स्ना
नं॥ हेमाद्रौ दानखंडे॥ स्वस्ति श्रीसमस्तजगदुत्पत्तिस्थितिप्रल
यकारणस्य रक्षाशिक्षाविचक्षणस्य प्रणयपारिजातस्यानं
5 तवीर्यस्य श्रीमद्भगवतो महापुरुषस्य श्रीमदादिनारायणस्या
चिंत्यापरिमितशक्त्या ध्रियमाणस्य महाजलौघमध्ये प
रिभ्रममाणानामनेककोटिब्रह्मांडानामेकतमेऽव्यक्तम
हदहंकारपृथिव्यप्तेजोवायुराकाशाद्यावरणैरावृतेऽस्मि
न्महति ब्रह्मांडखंडयोर्मध्ये आधारशक्तिकूर्मवाराहानंता
ष्टदिग्गजोपरिप्रतिष्ठितस्यातलवितलसुतलतलातल

तलातल रसातलातलमहातलसप्तपाताललोकास्योपरिवरभूर्लो
कभुवर्लोकस्वर्लोकमहर्लोकजनलोकतपलोकसत्यलोकषट्
स्याधोभागचक्रवालशैलमहामलयपनगमध्यवर्तिन्यांम
महाकालीपमहाफणिराजशेषस्यसहस्रफणामणि
मंडलमंडितेरावतपुंडरीकवामनकुमुदांजनपुष्पदंत
सार्वभौमसुप्रतीकाख्याष्टदिग्गजशुंडादंडपोद्दंडितेऽम
अ रावतीभोगवतीनपनवतीसिद्धवतीगंधर्ववतीकांतिव ५
तीकापशोवतीनामकपुण्यपुराप्रतिष्ठितेंद्राग्नियमनै
ऋतवरुणवायव्यकुबेरेशानादिकप्रमितेलोकालोका

वलवलयितेलवणेक्षुसुरासर्प्पिर्दधिक्षीरोदकाभिसप्ता
र्णवपरिमितेजंबूप्लक्षशाल्मलीकुशक्रौंचशाकपुष्कर
सप्तद्वीपद्वीपितेइंद्रद्वीकपमेरुताम्रगभस्तिनागसौम्यगं
धर्वचारणभारतेतिनवखंडात्मकमहासरोरुहाकारपं
चाशत्कोटियोजनविस्तीर्णभूमंडलेजंबुमेरुनिषधहेम
कूटहिमविंध्याचलानांहरिवर्षकिंपुरुषवर्षयोश्चदक्षि
णेनवसहस्रयोजनविस्कृतेमलयाचलादुत्तरेस्वर्णप्रस्थ
चांद्रशुक्लआवर्त्तनरमणकमहाहाहरणपांचजन्यसिं
हललंकेतिनवखंडेतिभारतवर्षेभरतखंडेजंबूद्वीपे

कुरुक्षेत्रादिसमभूमध्यरेखायां पूर्वदिकूभागे श्रीगंगायमुनयोर्म
ध्यदेशे भागीरथ्याः पश्चिमे तटे यमुनाया उत्तरे कूले मतंगमा॰
न्यवंलोकविंध्यत्रिकूटचित्रकूटश्वेताद्रिकूटसह्यं उकारण्ये चं
पंकारण्ये काम्यकारण्ये बदरिकारण्ये नेमिकारण्ये पुण्या॰
रण्ययोर्मध्यदेशे पंचक्रोशमध्ये भास्करादिक्षेत्रसक॰
लजगत्स्रष्टुःपरार्द्धद्वयजीविनो ब्रह्मणः प्रथमपरार्द्धं पं॰
6 चाशताततीतं द्वितीयपरार्द्धे चाशतादिवर्षे प्रथमदिवसे पं३
[illegible] प्रथमचरणे इतिद्विती
ययामे तृतीये मुहूर्ते श्वेतवाराहकल्पे सप्तमे वैवस्व॰

तमन्वंतरे अष्टाविंशतितमे महाकलिकलियुगप्रथमचरणे
शालिवाहनशके बौद्धावतारे चांद्रसौरसावननक्षत्रा
दिमानप्रभवादिषष्टिसंवत्सराणां गणिलोत्क्रमार्गेण अ
मुकसंवत्सरे अमुकऋतौ महामांगल्यप्रदे अमुकमा
से अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्ष
त्रे अमुकराशिस्थिते चंद्रे अमुकराशिस्थिते सूर्ये अमु
कराशिस्थिते श्रीदेवगुरौ शेषेषु ग्रहेषु यथायथास्थानं स्थि
तेषु सत्सु एवंमादिग्रहगुणविशेषणविशिष्टायां पुण्य
तिथौ मम श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं अमुकगोत्र

स्यअमुकशर्मणः ममजन्मप्रभृति अद्यदिनं यावत् बाल्यकुमा
रयौवनवार्द्धकेषु ज्ञानादज्ञानकृत वाङ्मनकायकृताऽ
नां बुधिपूर्वाणां अबुद्धिपूर्वाणां सकृत्सकृदभ्यासविष
याणां अनुमंत्रितप्रतिज्ञोपकर्तृभेदभिन्नानां ब्रह्महाम
द्यपस्तेयीनथैवगुरुतल्पगाः॥ महापातकिनस्त्वेतेतत्स
संसर्गी च पंचमः॥ महापातकतुल्यानि पापान्युक्तानि यानितु
॥ तानिपातकसंज्ञाचेतन्न्यूनमुपपातकं॥ तदनुपातकगोव
धपातक गोवधगुरुतल्पगसुरापानसुवर्णस्तेयाशरणानांच
लपक्रिरसहायपर्णविक्रयपरिवेदनधनार्थेद्रुमच्छेदनस्त्रीहिं

स्योषधिजीवनहिंसायांत्रिविधानेनऋणाहापालकस्त्वया॥ संक
रीकरणमलिनीकरणअपात्रीकरणजातिभ्रंशकराणि ब्राह्मण
स्त्रीबालपशुजीवजातिवधब्राह्मणगमनविधवास्त्रीशूद्र
स्त्रीदासीवेश्यागमनस्थूलरहस्योपपातकानिगम्यंलोअगः
म्यागमनअभक्ष्याभक्षणअभोज्याभोजनअपेयापेयअलेह्या ले
ह्यअचोष्याचोष्यअस्पृश्यास्पृष्टपरमर्मोद्घाटनदेवब्राह्मणनि
न्दकदेवब्राह्मण॥ वृत्तिच्छेदनदुरालापदुर्भिक्षमित्रभार्यावि
सर्जनमातापितृतिरस्कारगुरुनिंदाब्राह्मणनिंदपरनिंदाब्रह्म
द्वेषकृतत्रिरात्रमभाषणवर्णद्विजभेदस्थूलसूक्ष्मजीवहिं

8

सांक्रूरकर्मान्नतलुब्धपिशुनत्वचोरपारंवड्नारीलंपटकरणकाष्ठः
स्पर्शचांडालशावास्थिस्पर्शरजस्वलास्त्रीस्पर्शमुखस्वा
दकुग्रामवासवाह्नि·क्षुरगुर्गंधदुर्भाडिदुष्टप्रतिग्रहदुर्जनसस
र्गअसाक्षिभोजनअदत्वातांबूलभक्षणअहःषड्वाशयनष
ड्वारोहणतोयपानषड्वार भोज्यभक्षणतथाऔषधसेव
नादिवासंगमनरप्यापेयास्वप्नेइंद्रियमनसेंद्रियनेत्रेंद्रियइं
द्रियनिहकरणस्वग्रामविरहितस्वग्रामश्रोत्रियत्यागपरनि
मंत्रणक्षणविप्राणामवदनअवंदिताशीर्वादआशीर्वादः
रहितकन्याविक्रयगवाविक्रयहयविक्रयविषविक्रयराज

प्रतिग्रहस्सोवर्णरजतताम्रकांस्यलोहादिपरद्रव्यापहरणाद्य
नयोनिसेवनदेवलार्घ्यपुष्पहरणलेलद्रव्यापहरणशोच
विरहितस्नानविरहितसंध्याविरहितओपासनविरहित
वैश्वदेवविरहिततीर्थयात्रात्रादिकर्मरहितकन्यापुत्रस
हभोजनकांस्यपात्रभोजननिषिद्धपत्रभोजनश्वानमार्जा
रमूषकोच्छिष्टभोजन॥ एकादशाहद्वादशाहप्रेताके
यांनभोजनज्वालापाकानां एकादश्यांभोजनयतिकालभो
जनकुतुलस्पृष्टान्नदेवस्त्रावेष्टेलान्नेनदुसमुद्रस्नानभानु
वासरद्वादश्यांपुनर्भोजनहंभयोऽमदमत्सरकुलजिह्वास्वा

त्रप्राणायाम एव विधिनान्येषां पापानां विशोधनार्थं । पतितसंसर्ग
पतितसहभोजन अनुमंत्रितभोजने पतितसंभाष इत्यादि अन्ये
षां विशोधनार्थं प्रायश्चित्तार्थं समस्तपितॄणां अक्षयपुण्य
लोकफलप्राप्त्यर्थं पंचाशत्कोटिविस्तीर्णभूमंडले अस्यां त्रि
9 वेण्यां गंगायमुनयोः संगमे स्नानमहं करिष्ये ॥ रतिसंकल्प
स्नायात् । स्त्रीणां विशेषः ॥ पाणिग्रहणमारभ्य स्वधर्म ८
परिपालन अधर्माभिरति पुंसां नाजीर्णयामबल । रजोदोषा
दियत्यापंकमिकापादिहिंसनं ॥ इत्याद्यं नः सर्वेषां पापानां प्र
शमनार्थं प्रायश्चित्तस्नानमहं करिष्ये ॥ ॥॥ ॥॥ पद्मपुराणे ॥

८

त्वं राजा सर्वतीर्थानां त्वमेव जगतः पिता। याश्चितितं तीर्थमिदं वं सर्व
पापैः प्रमुच्यते॥ विष्णुपादाग्रसंभूते गंगे त्रिपथगामिनी॥ भगीरथ
प्राप्पाते देवी गंगायां र्घ्यं नमोस्तु ते। विरंचितनये देवी ब्रह्मरंध्र
निवासिनी॥ सिध्मनां तु सुधादायें गंगायां र्घ्यं नमोस्तु ते॥ गंगा
यमुनयोर्मध्ये यत्र प्राची सरस्वती। तत्र स्नात्वा च पीत्वा च सर्वपा
पैः प्रमुच्यते तपनस्य सुते देवी यमुने त्वं महानदी॥ त्रैलोक्ये प
वित्र ख्याते गंगायां र्घ्यं नमोस्तु ते॥ दिने दिने तु वर्षस्य सहस्रे
तु विशांवर॥ तेन दत्तं हि गंगायां यो माघे स्नाति माधवः॥ स्वर्ण
भारसहस्रेषु कुरुक्षेत्रे रविग्रहे॥ सिते च माघे तु स्नानानां भवति

सिता

कुर्वं। मकरस्थे रवौ माघे गोविंदाच्युत माधव॥ स्नानेनानेन मे दे
व यथोक्तफलदो भव॥ ॥इति संकल्प्य मौनेन स्नायात्॥ ॥इमं
मंत्रं समुच्चार्य स्नायान्मौनं समास्थिता॥ वासुदेवं हरिं विष्णुमा
धवं च स्मरेत् पुनः॥ माघमासमिदं पुण्यं स्नास्येहं देव माध
वं॥ तीर्थपुण्यजलेनैव वशात्पर्षलवमे प्रभो॥ एकार्णवि विवरः
स्यान्ये यः शेते योगनिद्रया॥ बालरूपधरस्तस्मै नमो ह्यप्प १०
वराय च॥ नमस्कारः॥ मंदाकिनी नमस्तुभ्यं नमस्ते सुरपू
जिते॥ भोगवती नमस्तुभ्यं नागराजेन वंदिते॥ भागीरथी न
मस्तुभ्यं दुग्धसागरपाविनी॥ प्रयागचित्ररूपा त्वं त्रेभिवे त्वं

सरस्वती। विंध्ये त्वं नर्मदा रोद्री कुमारीस्य त्वां नमो नमः।। गंगाद्याः सरि
तः सर्वास्तव रूपाणि जाह्नवी। तस्मात्त्वं सर्वदा सेव्या श्रेष्ठया स्मि
न्कलौ युगे।। सरिद्वरे नमस्तुभ्यं शारदीशे नमोस्तु ते। जय गंगे न
मस्तुभ्यं नमस्तुभ्यं नमो नमः।। इति स्तुतिः।। सरस्वती नमस्तुभ्यं जा
ता ब्रह्मकमण्डलु।। प्रभासे मिलिता सिंधौ नमस्तुभ्यं महानदी।।
इति हेमाद्रिप्रायश्चित्तप्रयोगः।। संवत् ७८ मिति मार्गशीर्ष व ५ रवौ
तः जार्गं ताण ख्ये द पुस्य के तो ठ नै वैद्य परोपकारार्थं च।। श्रीरस्तु।।

१३०

प्रतिग्रहसौवर्णरजतताम्रकांस्य ॥

दे० सा० श्री प्रयाश्चित प्रयोग

१३०

४६६८